# Shri Vidyataraka Upanishad

# શ્રીવિદ્યાતારકોપનિષત્

## Document Information

Text title : vidyAtArakopaniShat

File name : vidyAtArakopaniShat.itx

Category : upanishhat, devii, devI, upanishad

Location : doc_upanishhat

Proofread by : Kasturi navya sahiti kasturinsahiti at gmail.com

Description-comments : aprakAshitA upaniShadaH

Latest update : March 20, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 20, 2020

*sanskritdocuments.org*

# શ્રીવિદ્યાતારકોપનિષત્

શં નો મિત્રઃ શં વરુણઃ - ઇતિ શાન્તિઃ ॥

## પ્રથમઃ પાદઃ ।

અથૈનમગસ્ત્યઃ પપ્રચ્છ હયગ્રીવં કિં તારકં કિં તરતિ ।
સ હોવાચ હયગ્રીવઃ । તારદીર્ઘાનુલમ્બિપૂર્વકં પ્રથમં ખણ્ડં
તતો દ્વિતીયં ખણ્ડં તતસ્તૃતીયં ખણ્ડં તતશ્ચતુર્થં
ખણ્ડં બ્રહ્માત્મસચ્ચિદાનન્દાત્મકમન્ત્રમિત્યુપાસિતવ્યમ્ । અકારઃ
પ્રથમકૂટાક્ષરો ભવતિ । ઉકારો દ્વિતીયકૂટાક્ષરો ભવતિ ।
મકારસ્તૃતીયકૂટાક્ષરો ભવતિ । અર્ધમાતૃકા ચતુર્થકૂટાક્ષરો
ભવતિ । બિન્દુઃ પઞ્ચમકૂટાક્ષરો ભવતિ । નાદઃ ષષ્ઠકૂટાક્ષરો
ભવતિ । તારકત્વાત્તારકો ભવતિ । તદેવ મન્ત્રતારકં ભવતિ ।
તદેવ મન્ત્રતારકબ્રહ્મ ત્વં વિદ્ધિ । તદેવોપાસિતવ્યમ્ ।
ગર્ભજન્મમરણસંસારમહદ્ભયાત્તં તારયતિ । તારકમિત્યેતત્તારકં
બ્રાહ્મણો નિત્યં મહીયતે । સ પાપ્માનં તરતિ । સ મૃત્યું તરતિ ।
સ બ્રહ્મહત્યાં તરતિ । સ ભ્રૂણહત્યાં તરતિ । સ વીરહત્યાં તરતિ ।
સ સર્વં તરતિ । સ સંસારં તરતિ । સોઽવિમુક્તમાશ્રિતો ભવતિ ॥

અકારાક્ષરસમ્ભૂતા વાગ્ભવા વિશ્વભાવિતા ।
ઉકારાક્ષરસમ્ભૂતા તેજસઃ કામરાજકા ॥

પ્રાજ્ઞો મકારસમ્ભૂતા તાર્તીયા ચ તૃતીયકા ।
અર્ધમાત્રા ષોડશી ચ બ્રહ્માનન્દૈકવિગ્રહા ॥

તસ્યાઃ સાન્નિધ્યવશતો જગદાનન્દદાયિની ।
ઉત્પત્તિસ્થિતિસંહારકારિણી સર્વદેહિનામ્ ॥

ત્રિકૂટા ભવતિ જ્ઞેયા મૂલપ્રકૃતિસઙ્ગતા ।

પ્રકૃતિઃ પ્રણવત્વાચ્ચ સા ત્રિકૂટત્રયાત્મિકા ॥

એવં યચ્ચાન્યત્ ત્રિકાલાતીતમ્ । ચતુષ્કૂટાત્મિકૈવ સર્વકૂટાત્મિકા બ્રહ્મમયી । તુર્યાત્મબ્રહ્મા સોઽયમાત્મા ચતુષ્પાજ્જગતઃ સ્થાનં ન બહિઃપ્રજ્ઞં નોભયતઃપ્રજ્ઞં સપ્તાઙ્ગ એકોનવિંશતિમુખઃ । સ્થૂલભુગ્વૈશ્વાનરાત્મિકાં કામપીઠાલયાં મિત્રેશનાથાત્મિકાં જાગ્રદ્દશાધિષ્ઠાયિનીમિચ્છાશક્ત્યાત્મિકાં કામેશ્વરીં પ્રથમકૂટાં મન્યન્તે ॥

ઇતિ પ્રથમઃ પાદઃ ।

## દ્વિતીયઃ પાદઃ ।

સ્વપ્નસ્થાનેઽનન્તઃ સંજ્ઞાસપ્તાઙ્ગ એકોનવિંશતિમુખઃ પ્રવિભક્તોઽભૂત્ । તૈજસાત્મિકાં જાલન્ધરપીઠાલયાં ષષ્ઠીશનાથાત્મિકાં વજ્રેશ્વરીં વિષ્ણ્વાત્મિકાં ક્રિયારૂપાં સ્વપ્નાવસ્થાનસ્થિતિરૂપામિચ્છાશક્તિસ્વરૂપિણીં દ્વિતીયકૂટાં મન્યન્તે ॥

ઇતિ દ્વિતીયઃ પાદઃ ।

## તૃતીયઃ પાદઃ ।

યત્ર સુપ્તો ન કઞ્ચન કામં કામયતે તત્સુષુપ્તમ્ । પશ્યન્તિ યત્ સુષુપ્તિસ્થાન એકીભૂતપ્રજ્ઞાનઘન એવાનન્દેઽભૂત્ । ઇચ્છાશક્તિરૂપાં સ્વપ્નાવસ્થાનસુષુપ્તિદશાધિષ્ઠાયિનીં સાનન્દકલાં તૃતીયકૂટાં મન્યન્તે ॥

ઇતિ તૃતીયઃ પાદઃ ।

## ચતુર્થઃ પાદઃ ।

એષા સર્વેશ્વર્યેષા સર્વોત્તમૈષાન્તર્યામ્યેષા યોનિઃ સર્વેષાં પ્રભવાપ્યયૌ હિ ભૂતાનામ્ । નોભયતઃપ્રજ્ઞા પ્રજ્ઞાનઘનાં ન પ્રજ્ઞાં નાપ્રજ્ઞામદૃષ્ટામવ્યવહાર્યામગ્રાહ્યામલક્ષણામચિન્ત્યામવ્યપદેશ્યામેકાત્મ-પ્રત્યયસારાં પ્રપઞ્ચોપશમનીં શાન્તાં શિવામદ્વૈતાં ષોડશાક્ષરીં

સ્ફુરત્તાદૃશાધિષ્ઠાયિનીં ચતુર્થખણ્ડાત્મિકાં
મન્યન્તે । સાત્મા વિજ્ઞેયા । સદોજ્જ્વલાવિદ્યા । તત્કાર્યહીના
સ્વાત્મબન્ધહરા સર્વદાદ્વૈતાનન્દરૂપા સર્બાધિષ્ઠાનસન્માત્રા
નિરસ્તાવિદ્યાતમોમોહાહમેવેતિ સમ્ભાવ્યાહમોં તત્સદ્યત્ પરમ્બ્રહ્મ
ચતુષ્કૂટા પરઞ્જ્યોતિસ્સાહમોમિત્યાત્માનમાદાય મનસા ચતુષ્કૂટામેકકાર્યાં
તદા ચતુષ્કૂટાહમિતિ તત્પરાઃ પ્રવદન્તિ । યેન તે સંસારિણ આત્મના
વિરાગા એવ । ન સંસારિણઃ । ય એવં વેદ સ મુક્તો ભવતિ સ મુક્તો
ભવતિ ઇત્યગસ્ત્યઃ । ઇત્યુપનિષત્ ॥

ઇતિ ચતુર્થઃ પાદઃ ।

(શાક્ત-ઉપનિષદઃ)

ઇતિ શ્રીવિદ્યાતારકોપનિષત્ સમાપ્તા ।

Proofread by Kasturi navya sahiti

---

*Shri Vidyataraka Upanishad*

pdf was typeset on March 20, 2020

Please send corrections to *sanskrit@cheerful.com*